# Shatanandamunikrita Shri Hari Stuti

# શતાનન્દમુનિકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Shatanandamunikrita Shri Hari Stuti

File name : shatAnandamunikRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Author : shatAnandamuni

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શતાનન્દમુનિકૃતા શ્રીહરિસ્તુતિઃ

(શાર્દૂલવિક્રીડિતમ્)
નીલેન્દીવરલોચનં શશિમુખં સન્દીપ્તરૂપાર્ચિતં
શ્રીમત્કેસરચન્દનાર્ચિતમથો હારાવલીભૂષિતમ્ ।
સદ્દિવ્યાક્ષરધામસંસ્થિતમમું મન્દસ્મિતં રાજિતં
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૧॥

શિક્ષાપત્રિવિચારમૌક્તિકપ્રભાસર્વાત્મતાસાધકં
દિવ્યાભૈર્વચનામૃતોત્થરણિતૈઃ સન્ધ્વસ્તજાડ્યાવલિમ્ ।
શ્રીશાલ્યુદ્ધવમાર્ગચાલકમહો ધર્માત્મજં શ્રીહરિં
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૨॥

પ્રોદ્દામપ્રસરત્પ્રશસ્યમહિમ શ્રીધીધૃતિપ્રાર્ચિતં
ત્રૈલોક્યેષ્ટવિધાનગૌરવચણપ્રજ્ઞાવિભાલઙ્કૃતમ્ ।
સર્વાનન્દકરપ્રચારુચરિતં વન્દારુસંવન્દિતં
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૩॥

અષ્ટૈશ્વર્યવિભૂષિતઞ્ચ સહજાનન્દપ્રપાવર્ષિણં
સર્વપ્રાર્થિતદિવ્યભવ્યવિભવોદ્દીપ્તપ્રભાવં ધ્રુવમ્ ।
ભક્તાભીષ્ટતતિપ્રદાનનિપુણં કારુણ્યરત્નાકરં
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૪॥

નવ્યોત્સર્પિરુચિપ્રભાવનિબિડપ્રોલ્લાસિશર્મ્મપ્રદં
સ્કન્ધાલમ્બિતદિવ્યકુણ્ડલધરં મન્દોન્નતભ્રૂલતમ્ ।
સર્વં સ્થાવરજઙ્ગમં જગદિદં સઞ્ચાલયન્તં સદા
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૫॥

યન્નામશ્રવણેન કેવલમહો પાપોચ્ચયો નશ્યતિ
યન્નામપ્રજપેન જાયત અહો સંવિત્પ્રભાસઞ્ચિતિઃ ।
યન્મૂર્તિપ્રવિલોકનેન સહસા બોભોતિ મુક્તિર્નૃણાં

વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૬॥

ભર્તારં હરિકૃષ્ણદેવમનઘં કાર્તાન્તકૃન્તનં
ચેતોધ્વાન્તહરં સમસ્તજગતામેકાન્તરક્ષાકરમ્ ।
દિવ્યૌદાર્યસમઞ્ચિતં શુભકરં મુક્તિપ્રદં સૌખ્યદં
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૭॥

આનન્દૈકરસપ્રવાહસરસં દેવાધિદેવં વિભું
યોગક્ષેમવિતાનકર્મ્મલસિતં સત્કર્મચુઞ્ચપ્રિયમ્ ।
શ્રેયઃ સર્વજનીનમાશુવિમલં વિસ્તારયન્તં ભુવિ
વન્દેઽહં પુરુષોત્તમં પ્રભુવરં શ્રીસ્વામિનારાયણમ્ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે ચતુર્થપ્રવાહે
ચતુર્થતરઙ્ગે શતાનન્દમુનિકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

*Shatanandamunikrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*